# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – आचार्य – २ | प्रश्नपत्रम् – ५ | गुणाः – ५० |
| विषयः – फलितज्योतिषम् | सत्रम् – ४ | समयः – १० तः १२ |
| दिनाङ्कः – १७/०७/२०२१ | सन्दर्भग्रन्थः – वास्तुरत्नावली, सचित्रसामुद्रिकरहस्यम् | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ स्ववर्गे द्विगुणं कृत्वा परवर्गेण योजयेत्।
अष्टभिस्तु हरेद् भागं योऽधिकः स ऋणी भवेत्॥

२ पूर्वे ब्राह्मणराशीनां वैश्यानां दक्षिणे शुभम्।
शूद्राणां पश्चिमे द्वारं नृपाणामुत्तरे मतम्॥

३ गजपृष्ठे भवेद्वासः स लक्ष्मीधनपूरितः।
आयुर्वृद्धिकरो नित्यं जायते नात्र संशयः॥

४ प्रासादेषु च हर्म्येषु गृहेष्वन्येषु सर्वदा।
आग्नेय्यां प्रथमं स्तम्भं स्थापयेत्तद्विधानतः॥

**प्रश्नः २** गृहद्वारनिर्णयः क्रियताम्।

**प्रश्नः ३** स्तम्भरोपणविचारः क्रियताम्।

**प्रश्नः ४** गृहारम्भे वृषवास्तुचक्रं सफलं वर्णयत।

**प्रश्नः ५** गृहारम्भे पञ्चाङ्गशुद्धिं निरूपयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ असिते धनवान् नेत्रे पीते पितृविनाशनः।
पाटले ह्रासवृद्धी च चित्रे तु तस्करो भवेत्॥

२ चक्राऽसि-परशु-तोमर-शक्ति-धनु-कुन्तसन्निभा रेखाः।
कुर्वन्ति चमूनाथं यज्वानमुलूखलाकाराः॥

३ या च काञ्चनवर्णाभा रक्तपुष्पसरोरुहा ।
सहस्राणां तु नारीणां भवेत् सापि पतिव्रता ॥
४ गौराङ्गी वा तथा कृष्णा स्निग्धमङ्गं मुखं तथा ।
दन्ता स्तनं शिरो यस्याः सा कन्या लभते सुखम् ॥

**प्रश्नः** ७ हस्ताङ्गुलिलक्षणं वर्णयत ।

**प्रश्नः** ८ तिलवर्णनं निरूपयत ।

**प्रश्नः** ९ भाग्यरेखाफलं लिखत ।

**प्रश्नः** १० मणिबन्धरेखाफलं लिखत ।

**प्रश्नः** ११ **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ वास्तुरत्नावली इति ग्रन्थः केन विरचितः ?
२ श्वेतवर्णा भूमिः कस्य वर्णस्य शुभं करोति ?
३ ब्राह्मणराशीनां द्वारं कस्यां दिशि शुभं भवति ?
४ गजपृष्ठभूमेः फलं किम् ?
५ मेषराशेः स्वामी ग्रहः कः ?
६ मूषकादि कति वर्गाः भवन्ति ?
७ प्रथमस्तम्भं कस्मिन् कोणे स्थापयेत् ?
८ कृष्णपक्षे गृहारम्भस्य किं फलम् ?
९ आयाः कति भवन्ति ?
१० मणिबन्धरेखायां प्रायः कति रेखाः भवन्ति ?
११ मातृरेखायाः अपरं नाम किम् ?
१२ पितृरेखायाः अपरं नाम किम् ?
१३ सिंहराशेः स्वामी ग्रहः कः ?
१४ चन्द्रस्य उच्चराशिः कः ?
१५ अपूर्वसंज्ञकः गृहप्रवेशः कः ?

****